PAPER - 1

# MT

2017 .... .... 1200

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - I**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

पाषाणखण्डानाम् उपयोजनम् इति ........ ।

(विधियुक्तम् आचरणम् / विधिविरोधि आचरणम्)

(ii) कः कं वदति ? १

अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

ISI चिह्नाङ्कितानि परिमाणानि विधिसम्मतानि ।

माता - अम्ब, नैष सम्यक् तोलयति । तोलनार्थं सम्यक् परिमाणमपि न योजयति । परिमाणस्थाने पाषाणखण्डं योजयति ।

माता - मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम्। तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम् ? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि ।

मधुरा - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः।

माता - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (१९७४) संवत्सरे स्थापिता एषा संस्था। 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चःग्राहकहितायैव बद्धपरिकरो वर्तते ।

द्वितीयः

शाकविक्रेता - यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय।

**२. स्वमतप्रकटनम् ।**

यदि त्वं वस्तुविक्रेत्रा वञ्चितः भवसि तर्हि किं करोषि इति माध्यमभाषया लिखत । २

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

कबड्डी इति ........ क्रीडा खेलितुं प्रतिसङ्घे ........ क्रीडापटवः आवश्यकाः सन्ति ।
(वैयक्तिकी / साङ्घिकी) (सप्त / द्वादश)

(ii) पूर्णवाक्येन उत्तरत । १

दक्षिणे तथा उत्तरभारते कबड्डीक्रीडा का नाम्ना विख्याता ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

कबड्डी बङ्गदेशे विशेषरूपेण लोकप्रियतां गता ।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः । काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिकक्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरूपेण लोकप्रियतां गता । 'हुतुतू' इति तस्या अपरनाम । तुकाराम-महाराजस्य अभङ्गवचनेषु एषा क्रीडा 'हमामा, हुंबरी, हुतुतू' इत्यादिभिः नामभिः निर्दिष्टा । बङ्गदेशे 'हुडू', दक्षिणभारते चेडुगुडु, उत्तरभारते 'कबड्डी' इति नाम्ना विख्यातैषा क्रीडा । अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति। क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति । पञ्च क्रीडापटवो बहिस्तिष्ठन्ति । एष क्रीडाप्रकारो न केवलं पुरुषाणाम्, अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति । अनया कबड्डी-क्रीडया शरीरचापल्यम्, उत्साहः, आक्रमकत्वं, स्वसंरक्षणवृत्तिः, शरीरसौष्ठवं च लभते । साहसं, निरीक्षणशक्तिः, योजकत्वं, निर्णयक्षमता, साङ्घिकी भावना, एकात्मता, देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति । एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यमिति ।

**२. पृथक्करणम् ।** २

गद्यांशे आगतानि कबड्डी क्रीडायाः नामानि

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) शीघ्रम्, सत्वरम्, झटिति, समीपे ।

२) पथि, रोगी, मार्गे, वीथ्याम् ।

(ii) गद्यांशात् द्वे विशेषणे चित्वा लिखत । १

........ , ........ सेवाभावः ।

(iii) गद्यांशे आगते द्वे पूर्वकालवाचक धातुसाधित-ल्यबन्त अव्यये चित्वा लिखत । १

अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ तदा तयोरेकः उक्तवान्, ''महाशय, अहं रसायनं कृत्वा आनीतवान् । पश्यतु भवानिति ।'' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, ''कथमिदानीम् अभाषमाणः तिष्ठसि ? किं त्वया नानीतं रसायनम् ?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, ''आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति । तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । 'येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम् ?' इति राज्ञा पृष्टे नागार्जुनोऽभणत्, ''एतेन रोगिणः सेवा कृता, मानवता दर्शिता । सेवाभावेन विना कथं चिकित्सको भवेत् ? अतः अस्यैव नियुक्तिः मया कृता ।'' सेवाभावः परमगहनोऽतः स एव परीक्षणीयः इति यत् कथ्यते तद्यथार्थमेव ।

२. **पृथक्करणम् ।**

**क्रमसंयोजनं कुरुत ।** २

(i) द्वौ युवानौ पथि रुग्णम् अपश्यताम् ।

(ii) द्वितीयः युवा अभाषमाणः अतिष्ठत् ।

(ii) द्वितीयः युवा रुग्णस्य सेवाम् अकरोत् ।

(iii) अपरेद्युः द्वौ युवानौ नागार्जुनं प्रति आगच्छताम् ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ।।१।।
माऽस्तु धनं मौक्तिकं काञ्चनम् अस्तु अविरतं तव प्रसादनम् ।
त्वत्स्पर्शान्मे भवतु सुवर्णं गुरुचरणाभ्यां सदा वन्दनम् ।।२।।

१. **शब्दज्ञानम् ।** १

चतुर्थपदं लिखत ।

१) कुम्भकारः : मृत्तिका :: मूर्तिकारः : ........ ।

२) निर्माणम् : विनाशम् :: स्मरणम् : ........ ।

२. **पृथक्करणम् ।** २



**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ।
ते त्यजन्ति ततः स्थानं प्रातिलोम्यान्न वेतसः ॥१॥
वेतसो वेगमायातं दृष्ट्वा नमति नापरे ।
सरिद्वेगे व्यतिक्रान्ते स्थानमासाद्य तिष्ठति ॥२॥
कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः ।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ॥३॥

**१. अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
सरिद्वेगं दृष्ट्वा वेतसः किं करोति ?

**२. तात्पर्यलेखनम् / स्पष्टीकरणम् ।** २
तृतीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**
**श्लोकपूर्तिं कुरुत । (केवलं १ श्लोकः लेखनीयः ।)** २
**सुभाषितं शुद्धं पूर्णं च लिखत ।**
(i) शनैः शनैः० ....... कदाचन ॥
(ii) साम्नैव ....... पटोलेन ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | शस्त्रं निहन्ति | इतरे च स्वशक्तितः । |
| (ii) | अतिथिर्बालकः पत्नी | यशश्च हन्ति । |
| (iii) | प्रज्ञा कुलं च विभवं च | पुरुषस्य शरीरमेकम् । |
| (iv) | पञ्चैते गृहिणाः पोष्याः | जननी जनकस्तथा । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २
**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | सप्तमी एकवचनम् | द्वितीया बहुवचनम् | पञ्चमी द्विवचनम् |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(सर्वाभ्याम्, तस्मिन्, पक्षिणः, वाचि, एतानि, भगवद्भ्याम्)

आ) **क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(ऐच्छत्, उवाच, भविष्यन्ति, ददामि, अस्तु, अभिजानीयात्)

इ) **समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत ।**

| | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| (i) | न्यायाय प्रासादः । | इतरेतर द्वन्द्व समास |
| (ii) | अधिकं मूल्यम् । | अव्ययीभाव समास |
| (iii) | न आदरः । | बहुव्रीहि समास |
| (iv) | धेनुः च पन्नगः च । | कर्मधारय समास |
| (v) | स्थिता प्रज्ञा यस्य सः । | चतुर्थी तत्पुरुष समास |
| (vi) | स्थानम् अनतिक्रम्य । | नञ् तत्पुरुष समास |
| | | द्विगु समास |

ई) **उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) अर्जुनः विहारार्थं ......... जगाम । (निबिडारण्ये / निबिडारण्यम् / निबिडारण्यात्)

(ii) परमेश्वरः भक्तान् ......... रक्षति । (विघ्नात् / विघ्नेन / विघ्नम्)

(iii) एषः क्रीडाप्रकारः ......... कृतेऽपि प्रचलितोऽस्ति । (महिलायाम् / महिलानाम् / महिलासु)

(iv) ......... नमः । (विद्यादेव्यै / विद्यादेवी / विद्यादेवीम्)

(v) ......... विना कथं चिकित्सकः भवेत् ? (सेवाभावः / सेवाभावात् / सेवाभावाय)

(vi) वृक्षः ......... फलानि यच्छति । (जनेभ्यः / जनान् / जनेषु)

उ) **सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) पापधिरेव = ......... + एव ।

(ii) चिदानन्दः = ......... + आनन्दः ।

(iii) ......... = कः + अर्थः ।

(iv) दत्त्वैव = ........ + एव ।

(v) ......... = वृक्षात् + अपतन् ।

(vi) ता अपि = ........ + अपि ।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) संवत्सरे ........ अयने स्तः । (2)

(ii) मम जन्मदिवसे मातामही ........ पक्वान्नानि करोति । (5)

(iii) कालिदासेन ........ नाटकानि लिखितानि । (3)

(iv) श्रीकृष्णः देवक्याः ........ अपत्यम् । ($8^{th}$)

(v) मया ......... अपि विदेशयात्रा न कृता । (once)

(vi) सप्ताहस्य ........ अहं मन्दिरं गच्छामि । (thrice)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| बालकः | धनं | गच्छति |
| धेनुः | दुग्धं | यच्छति |
| राजा | प्रश्नं | पृच्छति |
| आचार्यः | वनं | पिबति |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

'लोके न किम् अशक्यं नाम' इति कोऽपि ........ महापुरुषः प्राह। 'अशक्यम्' इति एतत् पदं मूर्खाणामेव कोशे लभ्यते, इति अन्य कश्चन महापुरुषः। 'अशक्यमपि शक्यं भवति ........ इति एकस्य सत्पुरुषस्य सुभाषितम्। अतो मानवेन प्रयत्न एव सततं कर्तव्यः। आलस्यं ........ विनाशाय कल्पते। आलस्येन गतं प्रदीर्घमपि जीवितं न जीवितम्। महान्तोऽपि गुणाः ........ यदि ते न उपयुज्यन्ते ।

( निष्फलाः, विदेशीयो, सर्वथा, प्रयत्नात्)

**Best of Luck**